श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला - १६

# भारतीयदर्शनसिद्धान्तप्रभा

प्रधानसम्पादकः
**प्रो. गोपबन्धुमिश्रः**
कुलपतिः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

सम्पादिका
**डॉ. बी. उमामहेश्वरी**
सहायिकाचार्या
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्,

**श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्- गुजरातम्**

**प्रकाशकः -**

**डॉ. दशरथजादवः**
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी,
राजेन्द्रभुवन रोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातराज्यम्
दूरभाषः - ०२८७६ - २४४५३२, फेक्सः २४४४१७
E-mail: sssu.veraval@gmail.com
Web: www.sssu.ac.in

**सहायकसम्पादकः समन्वयकश्च**

डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी,
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

***© Shree Somnath Sanskrit University, 2020***

**संस्करणम्** - प्रथमम्

**वर्षम्** - मार्च -२०२०

**प्रतिकृतयः** - ३५०

**ISBN** - 978-93-83097-35-7

**मूल्यम्** - ₹५१०/-

**मुद्रकः** - जलाराम ग्राफिक्स एन्ड ऑफसेट
परमहंस एपार्टमेन्ट के पास, होटेल कावेरी के पीछे,
एस. टी. रोड, वेरावल-३६२ २६६,
जि. गीर-सोमनाथ, गुजरात (भारत)
दूरभाष - ०२८७६-२२१८६१

## विषयसूची


| क्र.सं. | विषयः | नाम | पृ.सं |
|---|---|---|---|
| १. | संस्कृतवाङ्मये दार्शनिकसिद्धान्ताः | प्रो० उमाशङ्कर शर्मा ''ऋषि'' | ०१ |
| २. | साङ्ख्ययोगयोरीश्वरविमर्शः | प्रो० कृष्णकान्त शर्मा | २१ |
| ३. | शब्दार्थसम्बन्धानां नत्यत्वविमर्शः | प्रो० विनोदकुमार झा | ३५ |
| ४. | व्यवहारे सर्वे चार्वाकाः | प्रो० अर्चनाकुमारी दुबे | ४४ |
| ५ | स्वप्नवासवदत्ते दार्शनिकविचाराः | प्रो० महेन्द्रकुमार अं. दवे | ५१ |
| ६. | श्रीमद्भागवतमहापुराणे तृतीयैकादश-स्कन्धयोः साङ्ख्यदर्शनम् | डॉ० पङ्कजकुमार एस. रावल | ५५ |
| ७. | अभिज्ञानशाकुन्तले कर्मणःसिद्धान्तः | डॉ० डायालाल एम्. मोकरिया | ६६ |
| ८. | दर्शनेषु निहितयोः कर्मपुनर्जन्म-सिद्धान्तयोः वैदिकी अवधारणा | डॉ० भावप्रकाश गान्धी | ७३ |
| ९. | दर्शनशास्त्रेषु वेदस्याऽपौरुषेयत्वविचारः | डॉ० शत्रुघ्न पाणिग्राही | ८७ |
| १०. | आधुनिकपरिप्रेक्ष्ये कालः एकं चिन्तनम् | डॉ० बी. उमामहेश्वरी | ९५ |
| ११. | अद्वैतवेदान्ते मातृकाग्रन्थाः कैवल्यदीपिका च | डॉ० जानकीशरण आचार्य | १०२ |
| १२. | नास्तिकदर्शनेषु बौद्धदर्शनपरिचयः | भगीरथ आर्.त्रिवेदी | १२४ |
| १३. | ज्ञानकर्मानुगृहीता भक्तिरेव मोक्षकरी | चिन्तनः दि.जोषी | १३६ |
| १४. | कठकण्ठरवायितः अव्यक्तशब्दार्थपरामर्शः | साधु मङ्गलवर्धनदास | १४५ |
| १५. | न्यायनये पारिभाषिकशब्देषु लक्षणदोषाः | अपूर्वा भारद्वाज | १६० |
| १६. | वैशेषिकदर्शनस्य महत्त्वम् | राहुल कुमार झा | १७० |
| १७. | साङ्ख्यदर्शनस्य वैशिष्ट्यम् | किञ्जल गोरफाड | १७३ |
| १८. | श्रीहरिवाक्यसुधासिन्धौ पञ्चानाम् अनादितत्त्वानां विमर्शः | श्रीमती नम्रता पटेल | १७७ |
| १९. | वेदान्तदर्शने अविद्याविचारः | रविशङ्कर महापात्र | १८८ |
| २०. | श्रीमद्भगवद्गीता का अक्षरपुरुषोत्तम स्वामिनारायणभाष्य एक प्राथमिक आलोचन | प्रो० वसन्तकुमार म. भट्ट | १९२ |

# आधुनिकपरिप्रेक्ष्ये कालः एकं चिन्तनम्

**डॉ० बी. उमामहेश्वरी,**
दर्शनसङ्कायाध्यक्षा,
असि. प्रो. न्यायदर्शनम्,
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्।

**"कालः कलयते लोकं कालः कलयते जगत्।**
**कालः कलयते विश्वं तेन कालोऽभिधीयते॥**[१]

**कालः सृजति भूतानि कालः संहरते प्रजाः।**
**संहरन्तं प्रजाः कालं कालः शमयते पुनः" ॥**[२]

कालो नाम क्रियान्वितवस्त्वन्विताभिव्यक्ती-करणकः यः सः कालः। ऋते वस्तुक्रियाभ्यां कालस्य स्वतन्त्रास्तित्वं न भवति। कालस्य व्यवहारे क्रिया वा स्यात् उत वस्तु वा स्यात्। तत्र कालो नित्य इति केचन, अपरे च क्षणिकः काल इति भणन्ति। सर्ववस्तुक्रियाणां आधारभूतो कालः भवति। यद्यद्वस्तु जडचेतनात्मकमुत्पद्यते तत्सर्वस्यापि आधारः काल एव। **"जन्यानां जनकः कालो जगतामाश्रयो मतः"**[३]। क्रियावस्त्वभिव्यक्तीकरणे तथा पृथक्करणे च प्रामुख्यं कालस्यैव। अत एव नैयायिकैरुच्यते, **"अतीतादिव्यवहारहेतुः कालः"**[४] इति। व्यवहारे विद्यमानवस्तुक्रियाणां हेतुत्वेन अभिधीयते। एतेऽपि कालो नित्य इति मन्यन्ते। कालस्य नित्यत्वविषये कांश्चन विषयान् प्रस्तूयतेऽत्र। व्याप्याऽनित्यवस्तुक्रियाः अप्रधानीकृत्य व्यापकनित्यकालं प्रधानीकृत्य कालो नित्य इत्युच्यते। सः चलनात्मक इति केचन। चलनात्मकं

---

१ हारीतस्मृतिः
२ महाभारतम्, आदिपर्वः, १.२४८
३ न्यायसिद्धान्तमुक्तावली - ४५
४ तर्कसङ्ग्रहः - पृ- ६

किमिति चेत् **"अस्ति- जायते- वर्धते-** विपरिणमते- अपक्षीयते- **विनश्यते"** इति षड्भावविकारा एव चलनात्मकमित्युच्यते।

अयं कालः सर्ववस्तुक्रियान्वितो कथं भवतीतित्यत्र उदाहरणमेकं पश्यामः, **'दुर्योधनो हसितवान्'** इति श्रुते सहजतया आकाङ्क्षा उत्पद्यते, कदा सः हसितवान् इति। तर्हि तत्र समाधीयते, दुर्योधनः ह्यस्तनप्रातः षड्वादने हसितवानिति कालस्योल्लेखो भवति। तथैव वस्तुनः अपि। कालः क्षणिक इति मते, वस्तुक्रिययोर्विना न कालस्य व्यवहारः, न च अस्तित्वं सम्भवति। क्रियावस्तुनिमित्तीकृत्यैव कालस्य अस्तित्वं सम्भवति। तस्मात् क्रियावस्तुनोः क्षणिकत्वात् तन्निमित्तीभूतकालोऽपि क्षणिक इत्युच्यते। न च अस्वातन्त्र्यरूपकालस्य विशिष्टनित्यत्वं वक्तुं शक्यते। वस्तु क्रिया वा द्वावपि नित्यपरिवर्तनशीलौ। एतत्कालगतवस्तु एतद्भिन्नकालवस्तुतः भिन्नः। एतत् कालगतवस्तुनि, अनागतकालगतवस्तुनि च परमाणोर्न्यूनत्वम् उत अधिकत्वं वा अवश्यं भवति। एतत्कालगतवस्तु यदि शताणुसंख्याकं भवति तर्हि अनागतवस्तुनि एकाधिकशताणुसंख्याकं वा एकोनशताणुसंख्याकं वा भवतीत्यर्थः। तं निराकृत्य तत्तत्कालगत-वस्तुक्रिययोरेव चलनं भवति न तु कालस्येति नैयायिकाः। अतः अयं कालः नित्य उत अनित्यः इति विचारविषयो भवति। तद्यथासिद्धान्तं यथामतिश्च विचारयामः।

**"येनोत्पत्तिश्च जायेत येन कल्प्येत वै कलाः।**
**सोऽन्तवच्च भवेत् कालो जगदुत्पत्तिकारकः॥**

**येन मृत्युवशं याति कृतं येन लयं व्रजेत्।**
**संहर्ता सोऽपि विज्ञेयः कालः स्यात् कलनाऽपरः"** ॥

चराचरसकलप्राणिनां पाषाणादि जडानाञ्च क्षणक्षणं कलयति विनाशयति यः सः कालः। व्यवहारे घटितसमस्तक्रियाकलापानां चिन्हीभूतः काल एव। अतीतक्रियावस्तुज्ञापनार्थं कालस्य महती आवश्यकता वर्तते। यथा - 'रामो

बभूव' कदा रामो बभूव ? इत्यस्मिन् विषये कालाधारेणैव ज्ञातुं शक्यते। शतपत्रभेदनन्यायेन प्रथमपत्रभेदनकालादारभ्य ब्रह्मायुः पर्यन्तं अणोरणीयान्महतोमहीयान् कालान् वेदितुं कालेनैव सम्भवः। अनेन ज्ञायते यत् विना कालेन भूत-भविष्यत्-वर्तमानत्रैकालिकक्रियाकलापान् ज्ञातुं स्मृतिपथे धारयितुं अन्यान् बोधयितुं च सुतरां न सम्भवति।

**"कालः सृजति भूतानि कालः संहरते प्रजाः।**
**कालः स्वपिति जागर्ति कालो हि दुरतिक्रमः"॥**

क्षणक्षणोत्तरकालस्य लोकशास्त्रप्रसिद्धानि अभिधेयान्यभिधीयन्ते। सर्वकार्य्याणाञ्चोत्पत्तिस्थिति-विनाशहेतुः कालः, क्षण- लव- निमेष- काष्ठा- कला- मुहूर्त- याम- अहोरात्र- अर्धमास- मास- ऋतु- अयन- संवत्सर- युग- कल्प- मन्वन्तर- प्रलय- महाप्रलय इति। स चेत्थम् -

तत्र निमेषो नाम नेत्रपुटयोर्द्रागेव संयोजनवियोजनम्, त्रिलव इति यावत्। त्रिनिमेषाः कक्षः। त्रिकक्षाः काष्ठा, त्रिंशत्काष्ठाः कला। त्रिंशत्कलाः मुहूर्तम्। त्रिंशन्मुहूर्तानि दिवसः। पञ्चदशदिवसाः पक्षः। द्वौ पक्षौ मासः। द्वौ मासौ ऋतुः। ऋतवस्त्रयोऽयनम्। अयने द्वे संवत्सरः।

सत्ययुगस्य वर्षाणि – अष्टाविंशतिसहस्राधिक - सप्तदशलक्षाणि (१७,२८०००)। त्रेतायुगस्य वर्षाणि- षण्णवतिसहस्राधिक द्वादशलक्षाणि (१२,९६,०००)। द्वापरयुगस्य वर्षाणि - चतुःषष्टि-सहस्राधिकाऽष्टलक्षाणि (८,६४,०००)। कलियुगस्य वर्षाणि - द्वात्रिंशत्सहस्रा-धिकचतुर्लक्षाणि (४,३२,०००)। मिलित्वा चतुर्युगानां वर्षाणि विंशतिसहस्राधिक-त्रिचत्वारिंशल्लक्षाणि। तादृशचतुर्युगा नामेकसप्ततिः मन्वन्तरं भवति। एकमन्वन्तरस्य वर्षाणि-विंशतिसहस्राधिक-सप्तषष्टिलक्षोत्तर - त्रिंशत्कोटयः। तादृशचतुर्दश - मन्वन्तरकालः एककल्पः, ब्रह्मणः एकदिवसः। दिवसान्ते महर्जनतपःसत्यलोकान् विहाय स्वर्गादिपातालान्तानां दशलोकानां

खण्डप्रलयो भवति सोयं 'नैमित्तिकप्रलय' इत्युच्यते। नित्यप्रलयस्तु - ब्रह्मणो लवनिमेषादिषु प्रलीयतेऽकस्माद्वस्तुजातमिति स उक्तः। ब्रह्मणः शतवर्षाणां समाप्तौ अष्टावरणसहितब्रह्माण्डप्रलयो भवति सः खण्डप्रलयः 'प्राकृतिकप्रलय' उच्यते। सोऽयं महाविष्णो-रेकदिवसात्मकः कालः। महाविष्णोः शतवर्षसमाप्तौ सर्वं भावकार्यं सृष्टिमयं प्रलीयते सोऽयम् आत्यन्तिकप्रलयः- महाप्रलय उच्यते।

कारिकासु यथा-

**"क्षणद्वयं लवः प्रोक्तो निमेषस्तु लवत्रयम्।**
**त्रयाणां तु निमेषाणां कक्ष इत्यभिधीयते॥**

**पञ्चदशनिमेषाश्च काष्ठास्त्रिशत्तु ताः कला।**
**त्रिंशत्कलामुहूर्तः स्यात् त्रिंशद्रात्यहनी च ते॥**

**अहोरात्राः पञ्चदश पक्षो मासस्तु तावुभौ।**
**ऋतुर्मासद्वयं प्रोक्तमयनन्तु ऋतुत्रयम्॥**

**अयनद्वितयं वर्षे मानुषोऽयमुदाहृतः।**
**एष दैवस्त्वहोरात्रस्तैः पक्षादि च पूर्ववत्॥**
**दैववर्षसहस्राणि द्वादशैव चतुर्युगम्।**
**युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते॥**

**कृताब्दसंख्या तस्यान्ते सन्धिः प्रोक्तो जलप्लवः।**
**ससन्धयस्ते मनवः कल्पे ज्ञेयाश्चतुर्दश ॥**

**चतुर्युगसहस्रन्तु ब्रह्मणो दिनमुच्यते।**
**रात्रिश्चैतावती तस्य ताभ्यां पक्षादिकल्पना॥**

**ब्रह्मणः शतवर्षाणि महाविष्णोरहः स्मृतम्।**
**तस्य वर्षशतान्ते हि महाप्रलय उच्यते"**.[५]॥

काल इति यमस्य नामान्तरम्। अस्य विशेषकर्म जरायुजाण्डजश्वेद-जोद्भिज्जोत्पन्न ८४,००,००० लक्षात्मकप्राणयः निजकर्मोद्भवपरिपक्वप्रारब्ध-समाप्तिकाले तत्तद्देहेभ्यः प्राणान् आकृष्य देहान्तरे लोकान्तरे वा क्षेपयति। महाकाल इति शिवस्यापि नामान्तरम्। अयं न केवलं प्राणिमात्रम् अपि च स्तम्भादिब्रह्मपर्यन्तं सकलवस्तुव्यक्तिजातं युगपत् विलीनं करोति। अत एव महाकाल इत्यपि प्रसिद्धः।

**कालः कलयते विश्वं तेन कालोऽभिधीयते।**
**कालस्य वशगाः सर्वे देवर्षिसिद्धकिन्नराः।**
**कालो हि भगवान् देवः स साक्षात् परमेश्वरः॥**

काल इति यमः महाकलश्चेति पौराणिकाः। **"कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः"**.[६] इत्यमरे। आर्षविज्ञाने आम्नायषडङ्गान्तर्गातज्योतिष-शास्त्रमपि कालस्यैव ज्ञापिका। वेदपुरुषस्य चक्षुत्वेन ज्योतिश्शास्त्रं राराजते, **"ज्योतिषं नेत्रमुच्यते"**.[७]। विना ज्योतिश्शास्त्रं वेदवर्त्मनि पुरोगमनमन्ध-प्रथवत्प्रतिभाति। मुख्यतया ज्योतिश्शास्त्रं सूर्यचन्द्रा-दिनिर्दिष्टगमनज्ञापकम्, द्वितीयं च शुभाऽशुभकालस्य निर्देशनं निर्दिशति। सूर्यचन्द्रादिगमनेन काष्ठात् वत्सरपर्यन्तं कालगमनं ज्ञायते। यदा सूर्यचन्द्रयोर्गमनमगमनं भवति तदा कालः स्तब्धो भविष्यति। सूर्यपरिस्पन्दैरेव सुर्योदयसूर्यास्तमयादिकं सम्भवन्ति। सूर्योदयात् दिनं सूर्यास्तमयात् रात्रिश्चेत्येवं प्रकारेण वारमासादि-कालचक्रं प्रचलति। सूर्य एव कालः, काल एव सूर्येति अभिन्नतया सूर्यकालौ

---

[५] न्यायसिद्धान्तमुक्तावली, पृ.- १५४

[६] अमरकोशः, स्वर्गवर्गः, श्लो. - ६६

[७] आपस्तम्बधर्मसूत्रम्, पृ. - २०९

प्रतिभातः। सूर्यादिनवग्रहाणां स्वस्थान-परस्थानगमनेन शत्रुमित्रराशिगमनेन नक्षत्रमेलनेन नक्षत्रकूटेन च शुभाऽशुभकालस्य ज्ञानं भविष्यति।

स्वकर्मजनितपुण्यपापविशेषैः तत्तत् शुभाऽशुभ-कालेषु शुभाऽशुभकर्म क्रियते। मनुष्यस्य आगामिकाले सम्भविष्यमाना-शुभकर्मज्ञापकं तत्पूर्वं निमित्तं शकुनरूपेण ज्ञातुं शक्यते। अस्मिन् विषये शकुनशास्त्रं लोके प्रसिद्धं यथा- प्रयाणवेळायां बिडालादिमार्गाविरोधेन अशुभकर्म ज्ञाप्यते। तथैव शवदर्शनशकुनेन सर्वकर्मशुभं मन्यन्ते। एवं अनेकशः शास्त्रे लोके च शकुनं प्रसिद्धम्।

## उपसंहारः

एतावत्पर्यन्तं शास्त्रेषु कालः कथमुच्यते इत्यस्माभिः स्वल्पतया चर्चा विहिता। व्यवहारे आधुनिकयुगे च का कालस्य व्युत्पत्तिरितिचेत्, **अद्यतन काले सर्वेषामपि सविधे यस्याभावो वर्तते स एव कालः**। यत्किमपि कर्म कर्तव्यं तर्हि बालकादारभ्य षष्टिवर्षात्मकवृद्धपर्यन्तं एकमेव समाधानं कथ्यते तत् मम सविधे समयः नास्ति। यदि समयो मिलति तर्हि करोमि इति। वस्तुतः समयः सर्वेषां समानरूपेणैव वर्तते। किन्तु मनुष्यस्य आशा तृष्णा अधिका जाता। तदर्थं शतवर्षात्मकजीवनकालोऽपि न्यूनतया भाति। तस्मादन्तिमे अहमिदमेव वक्तुमीहे यत्, यावान्कालो भगवता प्रदत्तः तथा अस्माभिः स्वकर्मणा आनीतः तस्य कालस्य सदुपयोगं कुर्वन् कालस्य महत्त्वं जानीयुः। तथा सर्वदा इदं मनसि स्मर्तव्यम्-

**आशायाः ये दासाः ते दासाः सर्वलोकस्य।**
**आशा येषां दासी तेषां दासायते लोकः**[८]॥

---

८ सुभाषितरत्नभाण्डागारम् – पृ. - ७६-२८

## सन्दर्भग्रन्थसूची

१. सुभाषितरत्नभाण्डागारम्,
नारायण राम आचार्यकाव्यतीर्थः, व्रजजीवनप्राच्यभारतीग्रन्थमाला, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०१४।

२. अमरकोशः, श्रीमदमरसिंहविरचितः,
चौखम्बा संस्कृत सिरीज् आफीस्, वाराणसी, २००७।

३. न्यायसिद्धान्तमुक्तावली, श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचिता,
चौखम्बा संस्कृत संस्थान, वाराणसी।

४. तर्कसंग्रहः, श्रीमदन्नम्भट्टविरचितः, सं-श्रीकृष्णवल्लभाचार्यः,
चौखम्बा विद्याभवन, वाराणसी, २०१२।

५. आपस्तम्बधर्मसूत्रम्, श्रीमद्धरदत्तमिश्रविरचितया उज्ज्वलाख्यवृत्त्या संवलिता, चौखम्बा संस्कृत सिरीज् आफीस्, वाराणसी, १९८९।